# श्रीसत्यसंतुष्टतीर्थस्तुतिः

सत्ये नारायणे तुष्टो भक्तिभारेण यः सदा
सत्यसंतुष्टनामानं यतिराजं तमाश्रये ॥१॥

असंतुष्टो हि सत्यां यो वैराग्याधिक्यतः सदा
सत्यसंतुष्टनामानं यतिराजं तमाश्रये ॥२॥

सत्यं यः स्थापयन् वादे संतुष्टो वृषवद्बली
सत्यसंतुष्टनामानं यतिराजं तमाश्रये ॥३॥

सत्ये सात्यवतेयोक्ते संतुष्टो यः सदा सुधीः
सत्यसंतुष्टनामानं यतिराजं तमाश्रये ॥४॥

सत्यपूर्वे तु संकल्पे संतुष्टः स्वगुरौ च यः
सत्यसंतुष्टनामानं यतिराजं तमाश्रये ॥५॥

श्रीसत्यात्मकृतेयं श्रीपंचपद्यी सुखप्रदा
पठतां शृण्वतां चैव भक्तानां नात्र संशयः ॥६॥

॥ इति श्रीसत्यसंतुष्टतीर्थस्तुतिः ॥